श्री कामाक्षी स्तोत्रं

श्री कामाक्षी स्तोत्रं

कल्पानोकहपुष्पजालविलसन्नीलालकां मातृकां
कांतां कंजदळेक्षणां कलिमलप्रध्वंसिनीं काळिकां |
कांचीनूपुरहारदामसुभगां कांचीपुरीनायिकां
कामाक्षीं करिकुंभसन्निभकुचां वंदे महेशप्रियां || 1 ||

काशाभां शुकभासुरां प्रविलसत्कोशातकी सन्निभां
चंद्रार्कानललोचनां सुरुचिरालंकारभूषोज्ज्वलां |
ब्रह्मश्रीपतिवासवादिमुनिभिः संसेवितांघ्रिद्वयां
कामाक्षीं गजराजमंदगमनां वंदे महेशप्रियां || 2 ||

ऐं क्लीं सौरिति यां वदंति मुनयस्तत्त्वार्थरूपां परां
वाचामादिमकारणं हृदि सदा ध्यायंति यां योगिनः |
बालां फालविलोचनां नवजपावर्णां सुषुम्नाश्रितां
कामाक्षीं कलितावतंससुभगां वंदे महेशप्रियां || 3 ||

यत्पादांबुजरेणुलेशमनिशं लब्ध्वा विधत्ते विधि-
-र्विश्वं तत्परिपाति विष्णुरखिलं यस्याः प्रसादाच्चिरं |
रुद्रः संहरति क्षणात्तदखिलं यन्मायया मोहितः
कामाक्षीमतिचित्रचारुचरितां वंदे महेशप्रियां || 4 ||

सूक्ष्मात्सूक्ष्मतरां सुलक्षिततनुं क्षांताक्षरैर्लक्षितां
वीक्षाशिक्षितराक्षसां त्रिभुवनक्षेमंकरीमक्षयां |
साक्षाल्लक्षणलक्षिताक्षरमयीं दाक्षायणीं साक्षिणीं
कामाक्षीं शुभलक्षणैः सुललितां वंदे महेशप्रियां || 5 ||

ओंकारांगणदीपिकामुपनिषत्प्रासादपारावतीं
आम्नायांबुधिचंद्रिकामघतमःप्रध्वंसहंसप्रभां |
कांचीपट्टणपंजरांतरशुकीं कारुण्यकल्लोलिनीं
कामाक्षीं शिवकामराजमहिषीं वंदे महेशप्रियां || 6 ||

ह्रींकारात्मकवर्णमात्रपठनादैंद्रीं श्रियं तन्वतीं
चिन्मात्रां भुवनेश्वरीमनुदिनं भिक्षाप्रदानक्षमां |
विश्वाघौघनिवारिणीं विमलिनीं विश्वंभरां मातृकां
कामाक्षीं परिपूर्णचंद्रवदनां वंदे महेशप्रियां || 7 ||

वाग्देवीति च यां वदंति मुनयः क्षीराब्धिकन्येति च
क्षोणीभृत्तनयेति च श्रुतिगिरो यां आमनंति स्फुटं |
एकानेकफलप्रदां बहुविधाऽऽकारास्तनूस्तन्वतीं
कामाक्षीं सकलार्तिभंजनपरां वंदे महेशप्रियां || 8 ||

मायामादिमकारणं त्रिजगतामाराधितांघ्रिद्वयां
आनंदामृतवारिराशिनिलयां विद्यां विपश्चिद्धियां |
मायामानुषरूपिणीं मणिलसन्मध्यां महामातृकां
कामाक्षीं करिराजमंदगमनां वंदे महेशप्रियां || 9 ||

कांता कामदुघा करींद्रगमना कामारिवामांकगा
कल्याणी कलितावतारसुभगा कस्तूरिकाचर्चिता
कंपातीररसालमूलनिलया कारुण्यकल्लोलिनी
कल्याणानि करोतु मे भगवती कांचीपुरीदेवता || 10 ||

इति श्री कामाक्षी स्तोत्रं |